[1]जनकः-निका, [2]जनकः-निका, [3]जिजनिषकः-षिका, [4]जञ्जनकः-जन्जनकः-निका, जाजायकः-यिका ;

जनिता-त्री, जनयिता-त्री, जिजनिषिता-त्री, जञ्जनिता-जाजायिता-त्री ;

— [5]जनयन्-न्ती, जनयिष्यन्-न्ती-ती ; — —

[6]जायमानः, — जिजनिषमाणः, जञ्जन्यमानः-[A]जाजायमानः ;

जनिष्यमाणः, — जिजनिषिष्यमाणः, जञ्जनिष्यमाणः-जाजायिष्यमाणः ;

[7]प्रजा-प्रजानौ-प्रजानः ; — — — —

[8]जातम्-[B]जातः-जातवान्, जनितः, जिजनिषितः, जञ्जनितः-जाजायितः-तवान्;

---

1. 'जनिवध्योश्च' (7-3-35) इति निषेधात्, 'अत उपधायाः' (7-2-116) इति वृद्धिर्न भवति । एवं घञि, णमुल्यपि ज्ञेयम् ।
2. णिचि, 'अत उपधायाः' (7-2-116) इति प्राप्ता वृद्धिः, 'जनिवध्योश्च' (7-3-35) इति निषिध्यते । न च वृद्धौ सत्यामपि, 'जनीजृष्—' (गणसूत्रम्-भ्वादौ) इति वचनेन मित्त्वात्, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः स्यादिति शङ्क्यम् ; मित्त्वविधानस्य, चिण्णमुल्परकणौ दीर्घविकल्पविधानेन चारितार्थ्यात्। 'जनिवध्योश्च' (7-3-35) इति निषेधस्य जागरूकत्वाच्च । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
3. 'जनसनखनां सञ्झलोः' (6-4-42) इति सूत्रेण आत्वं तु नात्र प्रवर्तते। झलादौ सनि तद्विधानात् । अत्र चेडागमप्रवृत्त्या सनः झलादित्वाभावात् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
4. 'ये विभाषा' (6-4-43) इत्यनेन आत्वविकल्पः । आत्वाभावपक्षे, द्वित्वे, अभ्यासस्य 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुगागमः । आत्वपक्षे 'दीर्घोऽकितः' (7-4-83) इति अभ्यासस्य दीर्घे जाजायकः इति रूपम् । एवं यङन्ते सर्वत्र रूपद्वयं बोध्यम् । नुकः 'पदान्तवद्वाच्यः' (वा. 7-4-85) इति वचनात् कदाचित् परसवर्णाभावरूपोऽपि साधुरेव ।
5. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (1-3-86) इति ण्यन्तात् परस्मैपदमेव । न तु शानच् ।
6. 'दिवादिभ्यः—' (3-1-69) इति श्यन्प्रत्ययः । 'ज्ञाजनोर्जा (7-3-79) इति प्रकृतेः जादेशः ।
7. क्विपि, 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घः । 'न लोपः प्रातिपदिकान्तस्य' (8-2-7) इति नकारलोपः ।
8. ईदित्त्वेन, 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्णिषेधः । 'जनसनखनां सञ्झलोः' (6-4-42) इति नकारस्याकारः । सवर्णदीर्घः ।

A. 'जाजायमानेन भयेन नभ्राडतायताथो सहसोत्थितश्च ।' वा. वि. 3.44.

B. 'अथो कुमारस्तमजोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः ।' रघुवंशे 6.78.